**संस्कृत वार्ता:**

**दिनाङ्क** : 08/07/2026

**सायम** : 06:20

__**आदौ मुख्यवार्ता:**__

· प्रधानमन्त्रिणः नरेन्द्रमोदिनः इण्डोनेशिया-देशस्य 'योग्यकर्ता' नगरे यूनेस्को वैश्विक-सांस्कृतिक-अभिलेख-स्थलस्य 'प्रम्बानन्' मन्दिरस्य ऐतिहासिकं भ्रमणम्, प्रतिपादितं यत् मन्दिरस्य संरक्षणे भारतस्य सहभागिता द्वयोः देशयोः सांस्कृतिक-न्यासं प्रकटीकरोति।

· केन्द्रीय-गृहमन्त्री अमितशाहः जलाप्लावितेन प्रभावितानां राज्यानां मुख्यमन्त्रिभिः साकं दूरभाषेण सम्भाषणं विधाय केन्द्रसर्वकारपक्षतः सम्भाव्य-सर्वविध-साहाय्यस्य आश्वासनम् अयच्छत्।

· भारतीय-ऋतु-विज्ञान-विभागानुसारं देशस्य मध्य-पूर्वीय-भागेषु अतिवृष्टेः मेघगर्जनस्य च सम्भावना वर्तते ।

· अमरीकी-राष्ट्रपतिः डोनाल्ड ट्रम्पः उदघोषयत् यत् ईरान-देशेन साकं युद्ध-विरामाय कृतं संधि-ज्ञापनं सम्प्रति समाप्तिपदं एति।

· वैश्विक-भूराजनैतिक-चिन्तन-प्रभावात् भारतीय-शेयर-विपणौ भीषणः ह्रासः, सेन्सेक्स-निफ्टी-सूचकाङ्कौ सार्ध-द्वि-प्रतिशतात्मिका अपचितिः।

**अपिच,**

· फिफा विश्वकप-पादकन्दुक-प्रतिस्पर्धायां स्विट्जरलैण्ड-दलेन कोलम्बिया-दलं पराभूय प्रागुपान्त्य-चरणे अर्जेन्टिना-दलेन सह क्रीडा सुनिश्चिता कृता। ।

## **अथ वार्ताः विस्तरेण**

**प्रधानमन्त्री-प्रम्बाननम्-HL-1**

प्रधानमन्त्री नरेन्द्रमोदी अद्य इण्डोनेशिया-देशस्य योग्यकार्ता-नगरे संस्थिते यूनेस्को विश्व-न्यास-स्थले प्रम्बानन-मन्दिर-परिसरे इण्डोनेशिया-राष्ट्रपतिना प्रबोवो सुबियान्तो इत्यमुना साकं भ्रमणम् अकरोत्। तत्र पारम्परिक-गैमेलन-सङ्गीत-ध्वनिभिः शास्त्रीय-नृत्यैश्च प्रधानमन्त्रिणः अभूतपूर्वम् अभिनन्दनं विहितम्। नवम-शताब्द्याः अस्य मन्दिर-परिसरस्य अवलोकनावसरे प्रधानमन्त्रिणा मुख्य-शिव-मन्दिरे विशेष-पूजार्चना कृता, सहैव भारत-इण्डोनेशिया-देशयोः सहयोगेन मन्दिरस्य संरक्षण-प्रयासाः दृष्टाः। एकस्मिन् संयुक्त वक्तव्ये राष्ट्रपतिना प्रबोवो इत्यमुना प्रतिपादितं यत्, प्रम्बानन-मन्दिरं भारत-इण्डोनेशिया-देशयोः शतशः वर्षाणां प्राचीन-सभ्यतायाः प्रतीकभूतं वर्तते, मन्दिरस्य पुनरुद्धाराय च तेन भारताय कार्तज्ञं आविष्कृतम् । अत्रावसरे प्रधानमन्त्रिणा निगदितं यदियं यात्रा अतीव आध्यात्मिकी अविस्मरणीया च अजायत । द्वादश-शताब्दैः अस्य न्यासस्य संरक्षणाय श्रीमोदी इंडोनेशियाजनेभ्यः धन्यवादं विज्ञापितवान्।

जकार्ता-नगरे द्विपक्षीय-वार्तानन्तरं प्रेषिते संयुक्ते घोषणापत्रे भारत-इण्डोनेशिया-देशाभ्यां सर्वविध-आतङ्कवादस्य तीव्रा निन्दा विहिता । द्वयोः देशयोः नेतृभ्याम् अन्ताराष्ट्रिय-नियमानुसारेण आतङ्कवादस्य सम्मुखं दृढ-वैश्विक-प्रयासस्य आह्वानं विहितम्। उभाभ्यां प्रमुखाभ्यां वैश्विकस्तरे प्रतिबन्धितानां आतङ्कवादिनां सङ्घटनानां च विरुद्धं कठोर-कार्याचरणाय बलं प्रदत्तम् । उग्रवाद-विरोधी-सहयोगं च दृढीकर्तुन सहमतिः प्रकटिता।

स्वस्य त्रिदेशीय-प्रवासस्य द्वितीये चरणे प्रधानमन्त्री अद्यैव त्रीणि दिनानि यावत् ऑस्ट्रेलिया-देशस्य मेलबर्ननगरं प्राप्स्यति। तत्र सः ऑस्ट्रेलिया-प्रधानमन्त्रिणा एन्थनी अल्बनीज इत्यनेन साकं तृतीये भारत-ऑस्ट्रेलिया-वार्षिक-शिखर-सम्मेलने भागं ग्रहीष्यति। अनेन साकमेव, सः भारत-ऑस्ट्रेलिया-सीईओ-फोरम इत्यस्मिन् उभयदेशस्य शीर्ष-उद्योगपतीन् तथा च मेलबर्न-नगरे प्रवासी-भारतीय-सभां सम्बोधयिष्यति।

**<u>शाह-महाराष्ट्र परिस्थिति-HL-2</u>**

केन्द्रीय-गृहमन्त्री अमितशाहः अद्य अतिवृष्ट्या, जलौघ-सदृश-परिस्थित्या, सहैव भूस्खलनेन प्रभावितानां सङ्कटग्रस्तानां अनेकेषां राज्यानां मुख्यमन्त्रिभिः साकं दूरभाषेण सम्भाषणं विहितवान्। तेभ्यः केन्द्रसर्वकारस्य पक्षतः सम्भाव्य-सर्वविध-साहाय्यस्य दृढाश्वासनं च असौ अयच्छत्।

श्रीशाहेन महाराष्ट्रराज्ये भीषण-अतिवृष्ट्याः जलप्लावनस्य च स्थितेः समीक्षां कर्तुं महाराष्ट्रस्य मुख्यमन्त्रिणा देवेन्द्र फडणवीसेन सह विशेष-चर्चा अकारि। संवादावधौ गृहमन्त्रिणा मुख्यमन्त्रिणं प्रति सङ्कटकाले महाराष्ट्र-सर्वकारस्य सहयोगार्थं केन्द्रीय-प्रशासनात् सर्वविध-साहाय्य-प्रदानस्य प्रतिश्रुतिः अभिव्यक्ता। विगत-दिवसेषु महाराष्ट्रस्य विविधाः भूभागाः अविरत-अतिवृष्ट्या अत्यधिकं प्रभाविताः सन्ति।

अनेन सहैव, गृहमन्त्रिणा गुजरातराज्ये अतिवृष्ट्या जल-अवरोध-स्थितॉः सन्दर्भे गुजरातस्य मुख्यमन्त्रिणा भूपेन्द्र पटेलेन साकमपि मन्त्रणा कृता, राज्यस्य कृते च केन्द्रस्य पूर्ण-सहयोगस्य सङ्कल्पः घोषितः।

अपरतः, एकास्मिन् सामाजिकान्तर्जालीय-सन्देशे केरलस्य मुख्यमन्त्री वी. डी. सतीशनः सूचितवान् यत् केन्द्रीय-गृहमन्त्री अमितशाहः दूरभाष-माध्यमेन तेन सह संवादं कृत्वा 'वायनाड-आपदा' विषये सविस्तारं पृष्टवान्। श्रीसतीशनमहोदयेन ज्ञापितं यत् गृहमन्त्रिणा स्थितिं विज्ञाय आपद्-ग्रस्त-जनानां साहाय्यार्थं पूर्ण-सर्मथनस्य आश्वासनं प्रदत्तम्।

**<u>ऋतु-विज्ञान-HL-3</u>**

भारतीय-ऋतु-विज्ञान-विभागेन अद्य देशस्य मध्यम-एवं-पूर्वीयभागेषु अतिवृष्टेः मेघगर्जनस्य च कृते 'ऑरेंज-अलर्ट' इति नारङ्ग-वर्णीया संचेतना प्रसारिता। अनेन सहैव ऋतु-विभागेन जम्मू-कश्मीर-लद्दाख-हरियाणा-चण्डीगढ़-हिमाचलप्रदेशेष्वपि अतिवृष्टेः पूर्वानुमानं विहितम्।

विभागेनानेन संसूचितम् यत् आगामिषु द्वित्रिदिनेषु प्रावृट् उत्तर-अरब-सागरस्य अवशिष्टेषु क्षेत्रेषु तथा च राजस्थान-हरियाणा-पञ्जाबप्रान्तानां शिष्टेषु भूभागेषु अग्रे प्रवर्धमानः सन् सम्पूर्णे देशे पूर्णतः व्याप्तो भविष्यति।।

**अमरीका-ईरान -HL-4**

अमरीका-राष्ट्रपतिः डोनाल्ड ट्रम्पः उदघोषयत् यत् ईरान-देशेन सह सैन्य-सङ्घर्षं निर्वापयितुं हस्ताक्षरितं संधि-ज्ञापनं सम्प्रति समाप्तिपदं सम्प्राप्तो विद्यते। तेन अग्रे प्रतिपादितं यत् अमरीका सम्प्रति तेहरान-प्रशासनेन सह सम्भाषणं कर्तुं नैव वांछति। राष्ट्रपतेः ट्रम्पस्य इदं वक्तव्यं तुर्की-देशस्य राजधान्यां 'अङ्कारा' नगरे आयोजिते नाटो शिखर-सम्मेलनस्य वार्ताहरसम्मेलने आगतम्। एषः घटनाक्रमः होर्मुजजलपोते त्रिषु तैलग्राहक-पोतेषु अस्त्र-प्रहारेण सञ्जातस्य विवादस्य पश्चात् अमरीका-ईरानदेशयोः मध्ये प्रवृत्तस्य प्रत्यक्ष-सैन्य-आक्रमणस्य परिणामो वर्तते। यद्यपि ईरानेन अस्य आकमणस्य उत्तरदायित्वं प्रत्यक्षतया नैव अंगीकृतम्।

वाशिंगटन-तेहरानयोः मध्ये कृतः अयं युद्धविराम-संधिः षष्ठी दिनानां समयं प्रदातुं विहितः आसीत्, परन्तु कतर-देशे प्रवृत्ता अप्रत्यक्ष-वार्ता सकारात्मकं परिणामं विनैव समाप्ता। यस्य फलस्वरूपं गतरात्रौ अमरीकी-सेना ईरान-विरुद्धं नूतन-शृङ्खलायाः आक्रमणम् अकरोत्। इतः प्राक्, अमरीका द्वारा ईरानस्य 'होरमोजगान' प्रान्ते तथा च 'माहशह्र' इति पत्तन-नगरे कृतानां आक्रमणानां प्रतिकारे ईरानेनापि अमरीकी-सैन्य-प्रतिष्ठानेषु तीव्राः प्रहाराः विहिताः आसन्।

**शेयर-विपणौ HL-5**

अद्य भारतीय-शेयर-विपणौ महती विक्रय-प्रतिस्पर्धा दृष्टा, यस्य प्रभावात् सेन्सेक्स निफ्टी इत्येतौ उभावपि प्रमुख-सूचकाङ्कौ शतप्रतिशतं सार्ध-द्वि-प्रतिशतात्मिका अपचितिः अभवत् ।

**जम्मू-श्रीअमरनाथ यात्रा परामर्श**

जम्मू-कश्मीर-प्रशासनेन अद्य 'श्री अमरनाथजी यात्रामुद्दिश्य एका नवीना निर्देशिका प्रसारिता, यस्यां सर्वैः तीर्थयात्रिभिः पञ्जीकरण-प्रक्रियायाः अथ सुरक्षा-मार्गदर्शिकानां निष्ठापूर्वकं दृढतापूर्वकं च पालनं कर्तुं समादिष्टम्।

आकाशवाण्याः जम्मू-वार्ताहरैः विज्ञापितम् यत् सर्वोच्चन्यायालयस्य निर्देशानुसारं निर्धारिता यात्रिणां प्रतिदिनस्य संख्या-सीमा सम्प्रत्यपि पूर्णतो प्रवृत्ता वर्तते। श्रद्धालवः परामृष्टाः यत् यात्रा-प्रारम्भात् पूर्वमेव अग्रिम-पञ्जीकरणं करणीयम्, अथ अनुमति-पत्रे उल्लिखिते दिनाङ्के एव यात्रा आरम्भणीया। प्रशासनेन स्पष्टीकृतं यत् अनुपदमेव पञ्जीकरणस्य सुविधा अत्यन्तं सीमितसंख्यासु एव उपलव्धा अस्ति, सा च केवलं रिक्त-स्थानानाम् उपलब्धताम् आधृत्य एव प्रदास्यते।

**फीफा-विश्वकप HL-6**

फीफा-विश्वकप-फुटबॉल-प्रतिस्पर्धायां फ्रांस-मरोक्को-नार्वे-इङ्ग्लैण्ड-स्पेन-बेल्जियम-अर्जेन्टीना-स्विट्जरलैण्ड-देशैः राउण्ड ऑफ -16 इत्याख्ये द्वन्द्वे विजित्य अन्तिमाष्टमेषु स्वस्थानं सुरक्षितम्। शुक्रवासरे तावत् प्रथमे प्रागुपान्त्यचक्रे रात्रौ सार्धैकवादने फ्रांस-देशस्य प्रतिस्पर्धा मरोक्को-देशेन सह भविष्यति । अपरस्मिन् द्वन्द्वे शनिवासरे रात्रौ सार्ध-द्वादशवादने स्पेन-देशः बेल्जियम-देशस्य सम्मुखं भविष्यति। ।

**॥ इति वार्ता: ॥**